मनु ॥" अत्र संभाव्यमानेभ्य दृष्ट्यादिगताञ्जनलिप्तत्वादिभ्यः कार्य्येभ्यो वदनादिगतसौन्दर्य्यविशेषरूपं प्रस्तुतं कारणं प्रतीयते । "गच्छामीति मयोक्तया मृगदृशा निःश्वासमुद्रेकिणं त्यक्त्वा तिर्य्यगवेक्ष्य वाष्पकलुषेणैकेन मां चक्षुषा । अद्य प्रेम मदर्पितं प्रियसखीवृन्दे त्वया बध्यतामित्थं स्नेहविवर्द्धितो मृगशिशुः सोत्प्रासमाभाषितः ॥" अत्र कस्यचिद्गमनरूपे कार्य्ये कारणमभिहितम् । तुल्येऽप्रस्तुते तुल्याभिधाने च द्विधा श्लेषमूला सादृश्यमात्रमूला च । श्लेषमूलापि समासोक्तिवद्विशेषणमात्रश्लेषे, श्लेषवद्विशेष्यस्यापि श्लेषे भवतीति द्विधा । क्रमेण यथा ॥ "सहकारः सदामोदो वसन्तश्रीसमन्वितः । समुज्ज्वलरुचिः श्रीमान् प्रभूतोत्कलिकाकुलः" ॥ अत्र विशेषणमात्रश्लेषवशादप्रस्तुतात् सहकारात् कस्यचित् प्रस्तुतस्य नायकस्य प्रतीतिः "पुंस्त्वादपि प्रविचलेद्यदि यद्यधोऽपि यायाद्यदि प्रणयनेन महानपि स्यात् । अभ्युद्धरेत्तदपि विश्वमितीदृशीयं केनापि दिक् प्रकटिता पुरुषोत्तमेन" ॥ अत्र पुरुषोत्तमपदेन विशेष्येणापि श्लिष्टेन प्रचुरप्रसिद्ध्या प्रथमं विष्णुरेव बोध्यते । तेन वर्णनीयः कश्चित्पुरुषः प्रतीयते । सादृश्यमात्रमूला यथा । "एकः कपोतपोतः शतशः श्येनाः क्षुधाभिधावन्ति । अम्बरमावृतिशून्यं हरि हरि शरणं विधेः करुणा" ॥ अत्र कपोतादप्रस्तुतात् कश्चित् प्रस्तुतः प्रतीयते । इयं क्वचित् वैधर्म्म्येणापि भवति । यथा "धन्याः खलु वने वाताः कह्लारस्पर्शशीतलाः । राममिन्दीवरश्यामम् ये स्पृशन्त्यनिवारिताः" ॥ अत्र वाता "धन्या अहमधन्या इति वैधर्म्म्येण प्रस्तुता प्रतीयते । वाच्यस्य सम्भवासम्भवोभयरूपतया त्रिप्रकारेयम् । तत्र सम्भवे उक्तोदाहरणान्येव । असम्भवे यथा । "कोकिलोऽहं भवान् काकः समानः कालिमावयोः । अन्तरं कथयिष्यन्ति काकलीकोविदाः पुनः" ॥ अत्र काककोकिलयोर्वाकोवाक्यम् प्रस्तुताध्यारोपणं विनाऽसम्भवि । उभयरूपत्वे यथा । "अन्तश्छिद्राणि भूयांसि कण्टका बहवो बहिः । कथं कमलनालस्य मा भूवन् भङ्गुरा गुणाः" ॥ अत्र प्रस्तुतस्य कस्यचिदध्यारोपणम् विना कमलनालान्तश्छिद्राणाम् गुणभङ्गुरीकरणे हेतुत्वमसम्भवि अन्येषान्तु सम्भवीत्युभयरूपत्वम् ।

**अप्रहत** त्रि० न प्रहन्यते स्म प्र+हन–क्त न०त० । अक्षुण्णे (खिल) इति ख्याते अकृष्टभूम्यादौ । "ईषद्धौतं नवं श्वेतं सदशं यन्न धारितम् निर्णेजकाक्षालितञ्चाप्रहतं वास उच्यते" इति विधा०पा०उक्ते वासोभेदे अहतमिति पाठान्तरम् ।

**अप्रहन्** त्रि० न प्रहन्ति प्र+हन्–क्विप् न०त० स्त्रियां ङीप् । "कार्य्यनाशके तदनुग्राहके "त्वमेको अप्रहणं गृणीषे शवसाम्प्रतिम्" ऋ०६, ४४, ४ । "अप्रहणमनुग्राहकमिति" भा० ।

**अप्राकृत** त्रि० प्रकृतेरागतम् अण् प्राकृतम् न०त० । १प्रकृतिकार्य्यभिन्ने ईश्वरलीलादौ । प्रकृतेः स्वभावस्य अयम् अण् न०त० । २स्वभावसम्बन्धिभिन्ने असामान्ये मनुष्यादौ च । [अधमे ।

**अप्राग्र्य** त्रि० न प्राग्र्यः प्रधानः विरोधे न०त० । श्रेष्ठभिन्ने

**अप्राण** त्रि० नास्ति देहादुत्क्रान्तत्वात् प्राणो यस्य । १मृते शवे । सर्वथा प्राणशून्ये २ईश्वरे पु० अप्राणोह्यमनो बुद्धिरिति" श्रुतिः ।

**अप्राप्त** त्रि० न प्राप्तः प्रमाणान्तरावगतः । १ प्रमाणान्तरानवगते "अप्राप्तप्रापको विधिरिति" "अप्राप्ते तु विधीयन्ते बहवोऽप्येकयत्नतः" इति च मीमांसा । २अनागते च ।

**अप्राप्तकाल** त्रि० न प्राप्तः कालोऽस्य । अप्राप्तसमये । "अवयवविपर्य्यासवचनमप्राप्तकालमिति" गौ०सू० उक्ते २सभाक्षोभव्यामोहादिना व्यत्यस्ताभिधानरूपे वादिदोषभेदे च । प्रतिज्ञाहेतूदाहरणादीनां यथाक्रमं विन्यासे हि वादसमयः । तेषां व्युत्क्रमकथने वादिनो निग्रहः ।

**अप्राप्तप्रापक** पु० अप्राप्तं प्रापयति बोधयति प्र+आप–णिच्–ण्वुल् ६त० । प्रमाणान्तरेणानवगतस्य यागादीनामिष्टसाधनत्वस्य कृतिसाध्यत्वस्य वा बोधके लिङादौ शब्दे । तथा च प्राथमिकप्रवृत्तिजनकप्रतीतिजनकत्वं तत्त्वम् भवति च स्वर्गकामोयजेतेत्यादौ लिङ्युक्तं वाक्यं, यागे इष्टसाधनतां कृतिसाध्यतां वा बोधयत् प्रेरकत्वात्तथा । अप्राप्ता दश्यावस्था यस्य ततः स्वार्थे कन् देवकवत् उत्तरपदलोपः । २अप्राप्तदश्यावस्थे वत्से "पादश्चाप्राप्तके देयः" स्मृतिः "अप्राप्तके अप्राप्तदश्यावस्थे" इति रघु० ।

**अप्राप्तव्यवहार** त्रि० न प्राप्तः व्यवहारयोग्यः कालोऽस्य । "अप्राप्तव्यवहारोऽसौ यावत् षोड़शवर्षक" इति दक्षोक्ते अपूर्णषोड़शवर्षवयस्के बाले "गर्भस्थैः सदृशो ज्ञेय आष्टमात् वत्सराच्छिशुः । बाल आ षोड़शादर्वाक् पौगण्डश्च निगद्यते । परतोव्यवहारज्ञः स्वतन्त्रः पितरावृते इति" नारदः । "अप्राप्तव्यवहाराणां धनं व्ययविवर्जितम् । न्यसेयुर्बन्धुमित्रेषु प्रोषितानां तथैव च" कात्या० स्मृतिः ।

**अप्राप्ता** स्त्री न प्राप्तः विवाहप्रशस्तकालोऽस्याः ब० उत्तरपद लोपः । अप्राप्तविवाहप्रशस्तकालायां कुमार्य्याम् ।